दशेन्द्रियसमन्वितम् । अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनमिति” । तच्च द्विविधं परमपरञ्च । परं हिरण्यगर्भलिङ्गशरीरम् । अपरमस्मदादिलिङ्गशरीरम् । तत्र हिरण्यगर्भलिङ्गशरीरं महत्तत्त्वम् अस्मदादिलिङ्गशरीरञ्चाहङ्कारतत्त्वमित्याख्यायते । एवं तमोगुणयुक्तेभ्यः पञ्चीकृतभूतेभ्योभूम्यन्तरिक्षस्वर्गमहोजनस्तपःसत्यात्मकस्योर्द्ध्वलोकसप्तकस्य अतलपातालवितलसुतलतलातलरसातलमहातलाख्यस्याधोलोकसप्तकस्य ब्रह्माण्डस्य जरायुजाण्डजस्वेदजोद्भिज्जाख्यचतुर्विधस्थूलशरीराणाञ्चोत्पत्तिः । तत्र जरायुजानि जरायुभ्योजातानि मनुष्यपश्वादिशरीराणि । अण्डजानि अण्डेभ्योजातानि पक्षिपन्नगादिशरीराणि । स्वेदजानि स्वेदाज्जातानि यूकमशकादिशरीराणि । उद्भिज्जानि भूमिमुद्भिद्य जातानि वृक्षादिशरीराणि वृक्षादीनामपि पापफलभोगायतनत्वेन शरीरित्वम् । तत्र परमेश्वरस्य पञ्चतन्मात्राद्युत्पत्तौ सप्तदशावयवोपेतलिङ्गशरीरोत्पत्तौ हिरण्यगर्भस्थूलशरीरोत्पत्तौ च साक्षात्कर्तृत्वम्, इतरनिखिलप्रपञ्चोत्पत्तौ च हिरण्यगर्भद्वारा “हन्ताहमिमास्तिस्रोदेवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति” श्रुतेः । हिरण्यगर्भोनाम मूर्त्तिस्तयादन्यः प्रथमोजीवः “स वै शरीरी प्रथमः स वै पुरुषउच्यते । आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्त्तत” “हिरण्यगर्भः समवर्त्तताग्रे इत्यादि” श्रुतेः” । वेदा०प०

सूक्ष्मादिस्थूलभूतान्तोत्पत्तिमुक्त्वा ब्रह्माण्डोत्पत्तिमाह आत्मपु० “उत्पाद्य स्थूलभूतानि भगवान् भूतभावनः नीरेषु स्वात्मनो वीजं सहसैव समाक्षिपत् । क्षिप्तं तेन हि तद्वीर्य्यं नीराणामुपरि स्थितम् । दधिमण्डोपमम् कालात् काठिन्यमगमद् घनम् । कठिना पृथिवी सेयं रूढा सा दृश्यतेऽधुना । तस्याः सारसमुद्भूतो गोलकोऽभून्महालयः । कुक्कुटाण्डसमाकारःसप्तलोकस्य संस्थितिः । अनुसंवत्सरं कालं नीरेष्वासीत्तमन्ततः । सुषुप्कालावुसमोनित्यं वायुनाभ्याहतोऽभ्रमत् । स तु संवत्सरे पूर्णे विभिन्नः कुक्कुटाण्डवत् । तदन्तःपुरुषोजज्ञे सप्तलोकशरीरभृत् । इदं सर्वं पुमानेव भूतं भावि स्थितं च यत् । एष भोगस्य मोक्षस्य सर्वदृष्टेर्महेश्वरः । अनेन बर्धयत्येष स्थावराणि चराणि च । वक्तुमशक्योऽस्य महिमा विज्ञेयः सर्वदा न्नभिः । पादःसर्वाणि भूतानि त्रिपादात्मनि तिष्ठति । महिमाश्रयभूतो यो महिम्नः सोऽधिको यथा । तथैवास्य महिम्नोऽपि पुमानभ्यधिकोमतः । मार्गद्वयस्य कर्त्तायं वैदिकस्य सदा प्रभुः । प्रवृत्तेश्च निवृत्तेश्च स्वर्गमोक्षपुरं प्रति । अयमभ्यधिको यस्मात् सर्वस्माद्भौतिकादजः । तस्मात् विराडिति प्रोक्तो विशेषाद्राजते यतः । अधिष्ठाय पुरः सर्वास्थिरजङ्गमदेहिनाम् । पूरयत्यात्मना यस्मात् अतोयमधिपूरुषः । यस्मादभ्यधिकः सोऽयं ब्रह्माण्डान्तःस्थितः पुमान् । तस्य कार्य्यमिदं सर्वं गिरिदेहधरादिकम् । अयं यज्ञपुमान् हेतुर्ऋक्सामयजुषामपि । छन्दांस्यपि च सर्वाणि गायत्र्यादीनि जज्ञिरे । अस्मादजादयश्चापि विराजः पुरुषोत्तमात् । इन्द्रश्चाग्निश्च विप्राश्च मुखतोऽस्य विनिर्गताः । क्षत्रियाबाहुतस्तद्वत् ऊर्व्वोर्वैश्याश्च जज्ञिरे । भूमिःशूद्रास्तथा पद्भ्यां जाता अस्य महात्मनः । चन्द्रमामनसोजातो नेत्रात् तद्वत् दिवाकरः । प्राणात् प्रभञ्जनोजातो नाभेस्तु गगनं महत् । मस्तकात् स्वर्गलोकोऽयं श्रोत्राज् जाता इमादिशः । एवमन्येऽपिपुंसोऽस्मात् जाता लोका महात्मनः । द्रव्याणि वा तथा कालोवसन्ताद्यात्मको महान् । देवता यजमानो वा क्रियावातःपरा न हि । सहस्रमस्तको देवः सहस्रेन्द्रियवानपि । भूतभौतिकजातं स आवृत्यात्मा परःस्थितः । बुद्धिसाक्षिणमात्मानमेतस्मात् परतः स्थितम् । स्वप्रकाशमहं वेदसर्वाज्ञानविवर्जितम् । नामरूपात्मकं सर्वं कृत्वाऽस्ते योवदन्निव शक्र ! त्वं धातृवदनात् सम्यक् विज्ञास्यते भवान् । दिशोऽपि प्रदिशस्तद्वदध ऊर्द्ध्वं सएव हि । यतस्ततोऽत्र यज्ञेन यज्ञान्ते तेन तं द्विजाः । धर्म्मशब्देन तेनैते स्वर्गं यास्यन्ति तच्छिरः । पुंसोऽस्य मूर्द्धा स्वर्गः स्यात् चन्द्रसूर्य्यौ च चक्षुषी । प्राणः प्रभञ्जनः प्रोक्तो मध्यदेहोऽन्तरिक्षकम् । स्थलानि विविधान्यस्य मूत्राशय उदीरितः । भूर्लोकस्तु समग्रोऽयं पादावस्य प्रकीर्त्तितः । वक्त्रमाहवनीयस्तद्धृदयं चावसथ्यकः । सगार्हपत्यनाभः स्याद्दक्षिणाग्निर्मलोमतम् । उरोवेदिस्तथा दर्भालोमजातमुरःस्थितम् । ओषध्योवनस्पतयः शेषाः केशाः शरीरगाः । किं बहूक्तेन शक्याद्य संक्षेपेणावधारय । यदस्ति यच्च नास्त्यत्र तत्सर्वं स महेश्वरः” ।

काणादादिमते तु आदिसर्गे वायवीयेषु परमाणुषु भुज्यमानजीवादृष्टवशात् क्रियोत्पद्यते सा च क्रिया स्वाश्रयं परमाणुं परमाण्वन्तरेण संयुनक्ति ततोद्व्यणुकादिक्रमेण महान् वायुरुत्पद्यते तेन नोदितेषु तैजसपरमाणुषु क्रियोत्पद्यते तथा परमाणवः परमाण्वन्तरेण संहन्यमानाः संयुज्यन्ते इत्येवंरूपेण महाभूतोत्पत्तिरेवं शरीराणि चेन्द्रियाणि चतुर्द्दश भुवनान्युत्पद्यन्ते सर्वत्र चेश्वरोनिमित्तकारणम् । एतद्विवरणमारम्भवादशब्दे